ND
1062

गोपालसहस्त्रनामपत्रसं० २१

गोपा० ॥श्रीहंसायनमः॥श्रीगोपीनाथायनमः॥ॐ कैलासशिखरेरम्ये गौरीपृच्छतिशंकरं॥ब्रह्मां
॥१॥ डाखिलनाथस्त्वं॥सृष्टिसंहारकारकः॥१॥त्वमेवपूज्यसेलोकेब्रह्मविष्णुसुरादिभिः॥नि
त्यंपठसिदेवेशाकस्यस्तोत्रंमहेश्वर॥२॥आश्चर्यमिदमाख्यानंजायतेमयिशंकर॥तत्प्रा
णेशमहाप्राज्ञसंशयंछिंधिमेप्रभो॥३॥श्रीमहादेवउवाच॥धन्यासिकृतपुण्यासिपार्वति च॥
प्राणवल्लभे॥रहस्यातिरहस्यंचयत्पृच्छसिवरानने॥४॥स्त्रीस्वभावान्महादेविपुनस्त्वं
परिपृच्छसि॥गोपनीयंगोपनीयंगोपनीयंप्रयत्नतः॥५॥दत्तेचसिद्धिहानिःस्यात्॥॥
तस्माद्यत्नेनगोपयेत्॥इदंरहस्यंपरमंपुरुषार्थप्रदायकं॥६॥धनरत्नौघमाणिक्यं॥
तुरंगमगजादिकं॥ददातिस्मरणादेव॥महामोक्षप्रदायकं॥तत्तेहंसंप्रवक्ष्यामि॥शृणु ॥७॥
ष्वावहिताप्रिये॥योसौनिरंजनोदेव॥श्चित्स्वरूपीजनार्दनः॥८॥संसारसागरोत्तीर्ण
करणायनृणांसदा॥श्रीगंगाद्रवरूपेण॥त्रैलोक्यंव्याप्यतिष्ठति॥९॥ततोलोकाम
हामूढाः॥विष्णुभक्तिविवर्जिताः॥निश्चयंनाधिगच्छंति॥पुनर्नारायणोहरिः॥१०॥
निरंजनोनिराकारो॥भक्तानांप्रीतिकारकः॥वृंदावनविहाराय॥गोपालंरूपमुज्झितं॥ ॥श्रीहंस ॥१॥

११ ॥ मुरली बादना धारी ॥ राधायै प्रीतिमावहन् ॥ अंशांशेभ्यः समुन्मील्य ॥ पूर्णरूपः क
लायुतः ॥ १२ ॥ श्रीकृष्णचंद्रो भगवान् ॥ नंद गोपवरो द्यतः ॥ धरिणीरूपिणी मात यशो
दानंददायकः ॥ १३ ॥ द्वाभ्यां प्रयाचितो नाथो ॥ देवक्यां बसुदेवतः ॥ ब्रह्मणा प्रार्थितो
देवो ॥ देवैरपि सुरेश्वरि ॥ १४ ॥ जातो वन्यापि च नुतो ॥ मुरली बेदरेचिका ॥ तयासार्द्धं
बचः कृत्वा ॥ ततो जातो महीतले ॥ १५ ॥ संसार सार सर्बस्वं ॥ श्याम लं महदुज्वलं ॥ एत
ज्जोतिरहं वंद्यं ॥ चिंतयामि सनातनं ॥ १६ ॥ गौर तेजो विना यस्तु ॥ श्याम तेजः सम
र्चयेत ॥ जपेद्वा ध्यायते वापि ॥ स भवेत्पातकी शिवे ॥ १७ ॥ स ब्रह्महा सुरापी च ॥ स्वर्ण
स्तेयी च पंचमः ॥ एतैर्दोषैर्बिलिप्येत ॥ तेजोभेदान्महेश्वरि ॥ १८ ॥ तस्माज्ज्योतिरभू
द्द्वेधा ॥ राधामाधवरूपकं ॥ तस्मादिदं महादेवि ॥ गोपालेनैव भाषितं ॥ १९ ॥ दुर्बासस
सो मुनेर्मोहे ॥ कार्तिक्यां रासमंडले ॥ ततः पृष्टवती राधा संदेहं भेदमात्मनः ॥ २० ॥ नि
रंजनात्समुत्पन्नं ॥ मयाधितं जगन्मयि ॥ श्रीकृष्णेन ततः प्रोक्तं ॥ राधायै नारदा
य च ॥ २१ ॥ ततो नारदतः सर्बं ॥ बिरला बैष्णवा जनाः ॥ कलौ जानंति देवेशि ॥ ॥

॥गोपा० ॥२॥ गोपनीयंप्रयत्नतः॥२२॥ शठायकृपणायाथ॥ दांभिकायस्करेक्वचित्॥ ब्रह्महत्यामवाप्नो
ति॥ तस्माद्यत्नेनगोपयेत्॥ ॐअस्यश्रीगोपालसहस्रनामस्तोत्रमंत्रस्य॥ नारदऋषिः॥ अ
नुष्टुप्छंदः॥ श्रीगोपालोदेवता॥ कामोवीजं॥ मायाशक्तिः॥ चंद्रःकीलकं॥ श्रीकृष्णचंद्र
भक्तिजन्यफलप्राप्तये॥ श्रीगोपालसहस्रनामपाठेजपेविनियोगः॥ ॐऐंक्लींवीजं॥
श्रींह्रींशक्तिः॥ श्रीवृंदावननिवासकीलकं॥ श्रीराधाप्रियःपरंब्रह्म॥ इतिमंत्रःचतुः
बिधधर्मादिसिद्ध्यर्थेजपेविनियोगः॥ ॐक्लांअंगुष्ठाभ्यांनमः॥ ॐक्लींतर्जनीभ्यां
नमः॥ ॐक्लूंमध्यमाभ्यांनमः॥ ॐक्लैंअनामिकाभ्यांनमः॥ ॐक्लौंकनिष्ठिकाभ्यांन
मः॥ ॐक्लःकरतलकरपृष्ठाभ्यांनमः॥ ॐक्लांहृदयायनमः॥ ॐक्लींशिरसेस्वाहा॥ ॐ
क्लूंशिखायैवषट्॥ ॐक्लैंकवचायहुं॥ ॐक्लौंनेत्रत्रयायवौषट्॥ ॐक्लःअस्त्रायफ
ट्॥ अथध्यानं॥ कस्तूरीतिलकंललाटपटलेवक्षःस्थलेकौस्तुभं॥ नासाग्रेवर
मौक्तिकंकरतलेवेणुःकरेकंकणं॥ सर्वांगेहरिचंदनंसुललितंकंठेचमुक्ता
वली॥ गोपस्त्रीपरिवेष्टितोविजयतेगोपालचूडामणिः॥२४॥ फुल्लेंदीवरकांति ॥श्रीहस ॥२॥

मिंदुबदनंबर्हावतंसप्रियं ॥ श्रीबत्सांकमुदारकौस्तुभधरंपीतांबरंसुंदरं ॥ गोपीनां
नयनोत्पलार्च्चिततनुंगोगोपसंघावृतं ॥ गोविंदंकलवेणुवादनपरं ॥ दिव्यांगभूषं
भजे ॥ २५ ॥ श्रीगोपालोमहीपालो ॥ वेदवेदांगपारगः ॥ कृष्णःकमलपत्राक्षः ॥ पुंड
रीकःसनातनः ॥ २६ ॥ गोपतिर्भूपतिःशास्ता ॥ प्रहर्त्ताविश्वतोमुखः ॥ आदिकर्त्तम
हाकर्त्ता महाकालःप्रतापवान् ॥ २७ ॥ जगज्जीवोजगद्धाता जगद्भर्त्ताजगद्वसुः ॥
मत्स्योभीमःकुहूभर्त्ता ॥ हर्त्तावाराहमूर्त्तिमान् ॥ २८ ॥ नारायणोहृषीकेशो ॥ गोविंदो
महावंद्यइ गरुडध्वजः ॥ गोकुलेंद्रोमहीचंद्रः ॥ शर्वरीप्रियकारकः ॥ २९ ॥ कमलामुखलोलाक्षः
तिवापाठः पुंडरीकःशुभावहः ॥ दूर्बाशाःकपिलोभौमः ॥ सिंधुसागरसंगमः ॥ गोविंदोगोप
तिर्गोत्रं ॥ कालिंदीप्रेमपूरकः ॥ गोस्वामीगोकुलेंद्रो ॥ गोवर्द्धनबरप्रदः ॥ नंदादिगोकु ॥ ३० ॥
लत्राता ॥ दातादारिद्र्यभंजनः ॥ सर्बमंगलदाताच ॥ सर्बकामप्रदायकः ॥ ३१ ॥ आदिकर्
त्तामहीभर्त्ता ॥ सर्वसागरसिंधुजः ॥ गजगामीगजेद्धारी ॥ कामीकामकलानिधिः ॥ ३२ ॥ क × २
कलंकरहितश्चंद्रो ॥ बिंबास्योबिंबसत्तमः ॥ मालाकारःकृपाकारः ॥ कोकिलस्वर

गोपा० ॥३॥

म्नघ्नः ॥३३॥ रामो नीलांबरो देवो ॥ हली दुर्दममर्द्दनः ॥ सहस्राक्षपुरीभेत्ता ॥ महा
मारीविनाशनः ॥३४॥ शिवः शिवतमो भेत्ता ॥ बल्वलारातिप्रयोजकः ॥ कुमारीवदा
यीच ॥ वरेण्यो मीनकेतनः ॥३५॥ नारीनारायणो धीरो ॥ धीरापतिरुदारधीः ॥ श्री
पतिः श्रीनिधिः श्रीमान् ॥ मापतिः पतिराजहा ॥३६॥ वृंदापतिः कुलंग्रामी ॥ धाम
ब्रह्मसनातनः ॥ रेवतीरमणो रामः ॥ प्रियश्चंचललोचनः ॥३७॥ रामायणशरीरो
यं ॥ रामी रामः श्रियः पतिः ॥ शर्वरः शर्वरी सं शर्वः ॥ सर्वत्रशुभदायकः ॥ राधाराध ३८
यिता राधी ॥ राधाचित्तप्रमोदकः ॥ राधारतिसुखोपेतो ॥ राधामोहनतत्परः ॥ राधा ३९
वशीकरो राधा ॥ हृदयांभोजषट्पदः ॥ राधालिंगनसंमोहो ॥ राधानर्त्तनकौतुकः
॥४०॥ राधासंजातसंप्रीतो राधाकाम्यफलप्रदः ॥ वृंदापतिः कोशनिधिः ॥ को
कशोकविनाशनः ॥४१॥ चंद्रापतिश्चंद्रपति ॥ श्चंडकोदंडभंजनः ॥ रामो दाशरथ
थीरामो ॥ भृगुवंशसमुद्भवः ॥४२॥ आत्मारामो जितक्रोधो ॥ मोहो मोहांधभंजनः ॥
वृषभानुभवो भावी ॥ काश्यपिः करुणानिधिः ॥४३॥ कोलाहलो हली हाली ॥

राधासंगतिसंप्रीत इति वा पाठांतरं

॥कोकनिधि ॥वा पाठः ॥

श्रीकृष्ण ॥३॥

हलीहलधरप्रियः ॥ राधामुखाब्जमार्त्तंडो ॥ भास्करोरविजोविधुः ॥ ४४ ॥ विधिर्वि
धातावरुणो ॥ वारुणोवारुणीप्रियः ॥ रोहिणीहृदयानंदी ॥ वसुदेवात्मजोबली ॥ ४५ ॥
नीलांबरोरौहिणेयो ॥ जरासंधवधोमलः ॥ नागोजवांभोविरुदो ॥ विरूढोबरदोबली
॥ ४६ ॥ गोपथोविजयीविद्वान् ॥ शिपिविष्टःसनातनः ॥ परशुरामवचोग्राही ॥ वर
ग्राहीशृगालहा ॥ ४७ ॥ दमघोषोपदेष्टाच ॥ रथग्राहीसुदर्शनः ॥ वीरपत्नीयश
स्त्राता ॥ जराव्याधिविघातकः ॥ ४८ ॥ द्वारकावासतत्वज्ञो ॥ हुताशनवरप्रदः ॥ य
मुनावेगसंहारी ॥ नीलांबरधरः प्रभुः ॥ ४९ ॥ विभुःशरासनोधन्वी ॥ गणेशोग
णनायकः ॥ लक्ष्मणोलक्षणोलक्ष्यो ॥ रक्षोवंशविनाशनः ॥ ५० ॥ वामनोवाम
नीभूतो ॥ वमनोवामनारुहः ॥ यशोदानंदनःकर्त्ता ॥ यमलार्जुनमुक्तिदः ॥ ५१ ॥
उलूखलीमहामानो ॥ दामबद्धाह्वयीशमी ॥ भक्तानुकारीभगवान् ॥ केशवो
के २ बलधारकः ॥ ५२ ॥ शिहामधुहामोही ॥ वृषासुरविघातकः ॥ अघासुरविघा
तीच ॥ पूतनामोक्षदायकः ॥ ५३ ॥ कुब्जाविनोदीभगवान् ॥ कंसमृत्युर्महामखी ॥

॥ गोपा० ॥४॥ अश्वमेधो वाजपेयो ॥ गोमेधो नरमेधवान् ॥५४॥ कंदर्प्पकोटिलावण्य ॥ श्चं
द्रकोटिसुशीतलः ॥ रविकोटिप्रतीकाशो ॥ वायुकोटिमहाबलः ॥५५॥ ब्रह्मा
ब्रह्मांडकर्त्ता च ॥ कमलावांछितप्रदः ॥ कमली कमलाक्षश्च ॥ कमलामुख
लोलुपः ॥५६॥ कमलाव्रतधारी च ॥ कमलाभः पुरंदरः ॥ सौभाग्याधिकचित्तो
यं महामायी महोत्कटः ॥५७॥ ताडकारिः सुरत्राता ॥ मारीचक्षोभकारकः ॥ वि
॥ त्रि द श्वामित्रप्रियो दांतो ॥ रामो राजीवलोचनः ॥५८॥ लंकाधिपकुलध्वंसी ॥ विभी
षणवरप्रदः ॥ सीतानंदकरो रामो ॥ वीरो वारिधिबंधनः ॥ खरदूषणसंहारी ॥ सं
केतपुरवासवान् ॥५९॥ चंद्रावलीपतिः कूलः ॥ केशीकंसवधोमरः ॥ माधवो म
धुहा माध्वी ॥ माध्वीको माधवी विभुः ॥६०॥ मुंजाटवीगाहमानो ॥ धेनुकारिर्ध
रात्मजः ॥ वंशीवटविहारी च ॥ गोवर्द्धनवनाश्रयः ॥६१॥ तथा तालवनोद्देशी ॥ भां व +
डीरवनशंकहा ॥ तृणावर्त्तकृपारी वृषभानुसुतापतिः ॥६२॥ राधाप्राणसमो रा
धा ॥ वदनाब्जमधुव्रतः ॥ गोपीरंजनदैवज्ञो ॥ लीलाकमलपूजितः ॥६३॥ ॥ ः ॥ श्रीहरि ॥४॥

क्रीडाकमलसंदोहो॥ गोपीकाप्रीतिरंजनः॥ रंजकोरंजनोरंगो॥ रंगीरंगमहीरुहः॥ ६४ ॥
कामःकामारिभक्तोयं॥ पुराणःपुरुषःकविः॥ नारदोदेवलोभीमो॥ बालोबालमु
खांबुजः॥ अंबुजोब्रह्मसाक्षीच॥ योगीदत्तवरोमुनिः॥ ऋषभःपर्वतोग्रामो॥ नदी
पवनवल्लभः॥ ६६॥ पद्मनाभःसुरज्येष्ठो॥ ब्रह्मारुद्रोहिभूषितः॥ गणानांत्राण
कर्त्ताच॥ गणेशोग्रहिलोग्रही॥ ६७॥ गणाश्रयोगणक्रोधी॥ क्रोडीकृतजगत्त्रयः
यादवेंद्रोद्वारकेंद्रो॥ मथुरावल्लभोधुरी॥ ६८॥ भ्रमरःकुंतलीकुंती॥ सुतरक्षीमहा ।
मखी॥ यमुनावरदाताच॥ कश्यपस्यवरप्रदः॥ ६९॥ शंखचूडवधोद्दामो॥ गोपी
रक्षणतत्परः॥ पांचजन्यकरोरामी॥ त्रिरामीवनजोजयः॥ ७०॥ फाल्गुनःफाल्गु
नसखा॥ विराधवधकारकः॥ रुक्मिणीप्राणनाथश्च सत्यभामाप्रियंकरः॥ ७१ ॥
कल्पवृक्षोमहावृक्षो॥ दानवृक्षोमहाफलः॥ अंकुशोभूसुरोभावो॥ भ्रामकोभ
भ्रामकोहरिः॥ ७२॥ सरलःशाश्वतोवीरो॥ यदुवंशीशिवात्मकः॥ प्रद्युम्नोबल
कर्त्ताच॥ प्रहर्त्तादैत्यहाप्रभुः॥ ७३॥ महाधनोमहावीरो॥ वनमालाविभूषणः॥

॥ गोपा० ॥ पू ॥

तुलसीदाममसोभाढ्यो ॥ जलंधरविनाशनः ॥ ७४ ॥ शूरः सूर्यो मृतंडश्च ॥ भास्कर
रो विश्वपूजितः ॥ रविस्तमोहा वह्निश्च ॥ बाडवो वडवानलः ॥ ७५ ॥ दैत्यदर्प्पवि
नाशी च ॥ गरुडो गरुडाग्रजः ॥ गोपीनाथो महानाथो ॥ वृंदानाथो विरोधकः ॥ ७६ ॥
प्रपंची पंचरूपश्च ॥ लतागुल्मश्च गोपतिः ॥ गंगा च यमुनारूपो ॥ गोदा बेत्रव
ती तथा ॥ ७७ ॥ काबेरी नर्मदा तापी ॥ गंडकी सरयूरज ॥ राजसस्तामसः सत्वी ॥ स
र्वांगी सर्वलोचनः ॥ ७८ ॥ सुधामयो मृतमयो ॥ योगिनीवल्लभः शिवः ॥ बुद्धो बु
द्धिमतां श्रेष्टो ॥ विष्णुर्जिष्णुः शचीपतिः ॥ ७९ ॥ वंशी वंशधरो लोक ॥ विलोको
मोहनाशनः ॥ रवरावो रवोरावो ॥ बलो बालो बलाहकः ॥ ८० ॥ शिवो रुद्रो नलो
नीलो ॥ लांगुली लांगुलाश्रयः ॥ पारदः पावनो हंसो ॥ हंसारूढो जगत्पतिः ॥ ८१ ॥
मोहिनी मोहनो माया ॥ महामायो महासुखी ॥ वृषो वृषाकपिः कालः ॥ कालीदम
नकारकः ॥ ८२ ॥ कुब्जाभाग्यप्रदो वीरो ॥ रजकक्षयकारकः ॥ कोमलो वारुणो रा
जा ॥ जलजो जलधारकः ॥ ८३ ॥ हारकः सर्वपापघ्नः ॥ परमेष्ठी पितामहः ॥ खड्गधा

मृकंडइति पाठांतरम्

॥ श्रीहरि ॥ पू ॥

रीरूपाकारी॥राधारमणसुंदरः॥८४॥द्वादशारण्यसंभोगी॥शेषनागफणालयः॥
कामः श्यामः सुखश्रीदः॥श्रीहः श्रीदः पतिः कृतिः॥८५॥हरिर्नारायणो नारो॥नरो
त्तमइष्टप्रियः॥गोपालीचित्तहर्त्ता च॥कर्त्ता संसारतारकः॥८६॥आदिदेवो महादेवो
गौरीगुरुरनाश्रयः॥साधुर्मधुर्विधुर्धाता॥त्राताक्रूरपरायणः॥८७॥रोलंबी च
हयग्रीवो॥वानरारिर्वनाश्रयः॥वनं वनी वनाध्यक्षो॥महावंद्यो महामुनिः॥८८

बलंबलीबलाध्यक्षोमहामध्य इति पाठांतरम्

स्यमंतकमणिप्राज्ञो॥विज्ञो विघ्नविघातकः॥गोवर्द्धनो वर्द्धनीयो॥वर्द्धनी वर्द्धनप्रि
यः॥८९॥वर्द्धन्यो वर्द्धनो वर्द्धी॥वर्द्धिष्णुः सुमुखः प्रियः॥वर्द्धितो वृद्धको वृद्धो॥वृंदार
कजनप्रियः॥९०॥गोपालरमणीभर्त्ता॥सांबकुष्ठविनाशनः॥रुक्मिणीहरण
प्रेमा॥प्रेमी चंद्रावलीपतिः॥श्रीकर्त्ता विश्वभर्त्ता च नारायणनरो बली॥९१॥गणो
गणपतिश्चैव॥दत्तात्रेयो महामुनिः॥व्यासो नारायणो दिव्यो॥भव्यो भावुकधारकः
९२॥स्वः श्रेयसं शिवं भद्रं॥भावुकं भविकं शुभं॥शुभात्मकः शुभः शास्ता॥प्रश
शास्ता मेघनादहा॥९३॥ब्रह्मण्यदेवो दीनाना॥मुद्धारकरणक्षम॥कृष्णकमलपत्राक्षः॥

॥गोपा० ६॥

हंसः कमललोचनः ॥९४॥ हंसकामी सदाहंसः ॥ समस्तप्रियकारकः ॥ नंदी
नंदीमहानादी ॥ मादीमादनकः किली ॥९५॥ मिली हिली गिली गोली ॥ गोलोगे
लालयो गुली ॥९६॥ गुग्गुलीमारकी साखी ॥ बटः पिप्पलकः कृती ॥ म्लेछ
हा कालहर्त्ता च ॥ यशोदायशएव च ॥९७॥ अच्युतः केशवो विष्णुर्हरिः सत्यो ज
नार्द्दनः ॥ हंसो नारायणो नीलो ॥ लीनो भक्तिपरायणः ॥९८॥ जानकीवल्लभो
रामो बिरामो बिघनाशनः ॥ सहभानुर्महाभानु वीरभानुर्महोदधिः ॥९९॥
समुद्रोब्धिरकूपारः ॥ पारावारः सरित्पतिः ॥ गोकुलानंदकारी च ॥ प्रतिज्ञाप
रिपालकः ॥१००॥ सदारामः कृपारामो ॥ महारामो धनुर्द्धरः ॥ पर्वतः पर्वत
कारो ॥ गयो गेयो द्विजप्रियः ॥१॥ कमलाश्वतरो रामो ॥ रामायणप्रवर्त्तकः ॥ द्यौर्दिवो
दिवसो दिव्यो ॥ भव्यो भाविभयापहः ॥२॥ पार्वतीभाग्यसहितो ॥ भर्त्ता लक्ष्मीविलास
वान् ॥ विलासी साहसी सर्वी ॥ गर्वी गर्वितलोचनः ॥३॥ मुरारिर्लोकधर्मज्ञो ॥ जी
वनो जीवनांतकः ॥ यमो यमारिर्यमनो ॥ यामो यामविधायकः ॥४॥ वंशुलीपा

श्रीहंसः ॥६॥

शुली पांडुः ॥ पांडुरर्जुनवल्लभः ॥ ललिताचंद्रिकामाली ॥ मालीमालांबुजाश्रय ः ॥
॥ ५ ॥ अंबुजाक्षो महायज्ञो ॥ दक्षो चिंतामणिप्रभुः ॥ मणिर्दिनमणिश्चैव ॥ केदा
रो बदरीश्रयः ॥ ६ ॥ बदरीवनसंप्रीतो ॥ व्यासः सत्यवतीसुतः ॥ अमरारिनिहंता
च ॥ सुधासिंधुविधूदयः ॥ ७ ॥ चंद्रो रविः शिवः शूली ॥ चक्री चैव गदाधरः ॥ श्री
कर्त्ता श्रीपतिः श्रीदः ॥ श्रीदेवो देवकीसुतः ॥ ८ ॥ श्रीपतिः पुंडरीकाक्षः ॥ पद्मना
भो जगत्पतिः ॥ वासुदेवो प्रमेयात्मा ॥ केशवो गरुडध्वजः ॥ ९ ॥ नारायणः परं
धाम ॥ देवदेवो महेश्वरः ॥ चक्रपाणिः कलापूर्णो ॥ वेदवेद्यो दयानिधिः ॥ १० ॥
भगवान्सर्वभूतेशो ॥ गोपालः सर्वपालकः ॥ अनंतो निर्गुणो नित्यो ॥ निर्वि
कल्पो निरंजनः ॥ ११ ॥ निराधारो निराकारो ॥ निरासो निराश्रयः ॥ पुरुषः प्रणव ा भा
तीतो ॥ मुकुंदः परमेश्वरः ॥ १२ ॥ क्षणावनिः सार्वभौमो वैकुंठो भक्तवत्सलः
विष्णुर्दामोदरः कृष्णो ॥ माधवो मथुरापतिः ॥ १३ ॥ देवकीगर्भसंभूतो ॥ यशोदाव

॥ गोपा० ॥
॥ ७ ॥

स्तलोहरिः ॥ शिवः संकर्षणः शंभु ॥ र्भूतनाथो दिवस्पतिः ॥ १४ ॥ अव्ययः सर्वध
र्मज्ञो ॥ निर्मलो निरुपद्रवः ॥ निर्वाणनायको नित्यो ॥ नीलजीमूतसन्नि
भः ॥ १५ ॥ कलाक्षयश्च सर्वज्ञः ॥ कमलारूपतत्परः ॥ हृषीकेशः पीतवासा
वसुदेवप्रियात्मजः ॥ १६ ॥ नंदगोपकुमारार्यो ॥ नवनीताशनो विभुः ॥ पुराणः
पुरुषः श्रेष्ठः ॥ शंखपाणिः सुविक्रमः ॥ १७ ॥ अनिरुद्धश्चक्ररथः ॥ शार्ङ्गपा
णिश्चतुर्भुजः ॥ गदाधरः सुरार्त्तिघ्नो ॥ गोविंदो नंदकायुधः ॥ १८ ॥ वृंदावन
चरः शौरि ॥ र्वेणुवाद्यविशारदः ॥ तृणावर्त्तांतको भीमः ॥ साहसो बहुविक्र
मः ॥ १९ ॥ शकटासुरसंहारी ॥ बकासुरविनाशनः ॥ धेनुकासुरसंहारी ॥ पूत
नारि र्नृकेशरी ॥ २० ॥ पितामहो गुरुः साक्षी ॥ प्रत्यगात्मा सदाशिवः ॥ अप्र
मेयः प्रभुः प्राज्ञोऽप्रतर्क्यः स्वप्नवर्द्धनः ॥ २१ ॥ धन्यो मान्यो भवो भावो ॥ धीरः
शांतो जगद्गुरुः ॥ अंतर्यामीश्वरो दिव्यो ॥ दैवज्ञो देवसंस्तुतः ॥ २२ ॥ ॥ ॥ ॥

श्रीहस
॥ ७ ॥

क्षीराब्धिशायनो धाता ॥ लक्ष्मीवान्लक्ष्मणाग्रजः ॥ धात्रीपतिरमेयात्मा ॥ चंद्र
शेखरपूजितः ॥ २३ ॥ लोकसाक्षी जगच्चक्षुः ॥ पुण्यचारित्रकीर्त्तनः ॥ कोटि
मन्मथसौंदर्य्यो ॥ जगन्मोहनविग्रहः ॥ २४ ॥ मंदस्मिततनो गोप ॥ गोपिका
परिवेष्टितः ॥ फुल्लारविंदनयन ॥ श्चाणूरांध्रनिषूदनः ॥ २५ ॥ इंदीवरद
लश्यामो ॥ वर्हिवर्हावतंसकः ॥ मुरलीनिनदाल्हादो ॥ दिव्यमाल्यांवराहृतः ॥ २६ ॥
सुकपोलयुगः सुभ्रू ॥ युगलः सुललाटकः ॥ कंबुग्रीवो विशालाक्षो ॥ लक्ष्मी
वान्शुभलक्षणः ॥ २७ ॥ पीनवक्षाश्चतुर्बाहु ॥ श्चतुर्मूर्त्तिस्त्रिविक्रमः ॥ कलं
करहितः शुद्धो ॥ दुष्टशत्रुनिवर्हणः ॥ २८ ॥ किरीटकुंडलधरः ॥ कटकांगदमं
डितः ॥ मुद्रिकाभरणोपेतः ॥ कटिसूत्रविराजितः ॥ २९ ॥ मंजीररंजितपदः ॥ स
र्वाभरणभूषितः ॥ विन्यस्तपादयुगलो ॥ दिव्यमंगलविग्रहः ॥ ३० ॥ गोपिका
नयनानंदः ॥ पूर्णचंद्रनिभाननः ॥ समस्तजगदानंदः ॥ सुंदरो लोकनंदनः ॥
॥ ३१ ॥ यमुनातीरसंचारी ॥ राधामन्मथवैभवः ॥ गोपनारीप्रियो दांतो ॥ गोपीवस्त्र

॥गोपा०
॥८॥
क२

पहारकः॥३२॥शृंगारमूर्त्तिश्रीधामा॥तारकोमूलकारकः॥सृष्टिसंरक्षणो
पायः॥क्रूरासुरविभंजनः॥३३॥नरकासुरसंहारी॥मुरारिर्बैरिमर्द्दनः॥आदि
तेयःप्रियोदैत्य॥भीरोयदुकुलेश्वरः॥३४॥जरासंधकुलध्वंसी॥कंसारातिःसुवि
क्रमः॥पुण्यश्लोकःकीर्त्तनीयो॥यादवेंद्रोजगन्नुतः॥३५॥रुक्मिणीरमणःस
त्य॥भामाजांबवतीप्रियः॥मित्रविंदानाग्निजिती॥लक्ष्मणासमुपासितः॥३६॥
सुधाकरकुलेजातो॥ऽनंतःप्रबलविक्रमः॥सर्वसौभाग्यसंपन्नो॥द्वारका
पट्टनस्थितः॥३७॥भद्रासूर्यसुतानाथो॥लीलामानुषविग्रहः॥सहस्रषोड
शस्त्रीशो॥भोगमोक्षैकदायकः॥३८॥वेदांतवेद्यःसंवेद्यो॥वेद्योब्रह्मांडनायकः॥
गोवर्द्धनधरोनाथः॥सर्वजीवदयापरः॥३९॥मूर्तिमान्सर्वभूतात्मा॥आर्त्तत्रा
णपरायणः॥सर्वज्ञःसर्वसुलभः॥सर्वशास्त्रविशारदः॥४०॥षड्गुणैश्वर्यसं
पन्नः॥पूर्णकामोधुरंधरः॥महानुभावःकैवल्य॥दायकोलोकनायकः॥४१
आदिमध्यांतरहितः॥शुद्धसात्विकविग्रहः॥असमानःसमस्तात्मा॥शरणाग

श्रीहस्
॥८॥

तवत्सलः॥४२॥उत्पत्तिस्थितिसंहार॥कारणं सर्बकारणं॥गंभीरः सर्बभाव
ज्ञः॥सच्चिदानंदबिग्रहः॥४३॥बिष्वक्सेनः सत्यसंधः॥सत्यवाक्सत्यबिक्रमः॥
सत्यब्रतः सत्यरतः॥सत्यधर्मपरायणः॥४४॥आपन्नार्त्तिप्रशमनो॥द्रौपदी
मानरक्षकः॥कंदर्प्पजनकः प्राज्ञो॥जगन्नाटकबैभवः॥४५॥भक्तबस्यो गुणा
तीतः॥सर्वैश्वर्यप्रदायकः॥दमघोषसुतद्वेषी॥बाणबाहुविखंडनः॥४६॥भी
ष्मभक्तिप्रदो दिव्यः॥कौरवान्वयनाशनः॥कौंतेयप्रियबंधुश्च॥पार्थस्यंद
नसारथिः॥४७॥नरसिंहो महावीरः॥स्तंभजातो महाबलः॥प्रह्लादवरदः सत्यो
॥४८॥ देवपूज्योऽभयंकरः॥उपेंद्र इंद्रावरजो वामनो बलिबंधनः॥गजेंद्रवरदः स्वा
मी॥सर्बदेवनमस्कृतः॥४९॥शेषपर्यंकशायनो वैनतेयरथो जयी॥अव्या
हतबलैश्वर्य्यसंपन्नः पूर्णमानसः॥५०॥योगेश्वरेश्वरः साक्षी॥क्षेत्रज्ञो ज्ञा
नदायकः॥योगीहृत्पंकजावासो॥योगमायासमन्वितः॥५१॥नादबिंदुकला
तीतः॥चतुर्बर्गफलप्रदः॥सुषुम्णामार्गसंचारी॥देहस्यांतरसंस्थितः॥५२॥

देहेंद्रियमनःप्राण॥ साक्षीचेतःप्रसादकः॥ सूक्ष्मःसर्वगतोदेही॥ ज्ञानदर्पणगो
चरः॥५३॥ तत्त्वत्रयात्मकोव्यक्तः॥ कुंडलीसमुपाश्रितः॥ ब्रह्मण्यःसर्वधर्मज्ञः॥ शां
तोदांतोगतक्लमः॥५४॥ श्रीनिवासःसदानंदी॥ विश्वमूर्त्तिर्महाप्रभुः॥ सहस्रशीर्षा
पुरुषः॥ सहस्राक्षःसहस्रपात्॥५५॥ समस्तभुवनाधारः॥ समस्तप्राणरक्षकः॥
समस्तःसर्वभावज्ञो॥ गोपिकाप्राणवल्लभः॥५६॥ नित्योत्सवोनित्यसौख्यो
॥ नित्यश्रीर्नित्यमंगलः॥ व्यूहार्च्चितोजगन्नाथः॥ श्रीवैकुंठपुराधिपः॥५७॥ पू
र्णानंदघनीभूतो॥ गोपवेषधरोहरिः॥ कलापकुसुमश्यामः॥ कोमलःशांतवि
ग्रहः॥५८॥ गोपांगनावृतोनंतो॥ वृंदावनसमाश्रयः॥ वेणुवादरतःश्रेष्ठो॥ दे
वानांहितकारकः॥५९॥ बालक्रीडासमासक्तो नवनीतस्यतस्करः॥ गोपालका
नी × मिजारः॥ चौरजारशिखामणिः॥६०॥ परंज्योतिंपराकाशः॥ परावासःपरिस्फुटः
॥ अष्टादशाक्षरोमंत्र॥ व्यापकोलोकपावनः॥६१॥ सप्तकोटिमहामंत्रः॥ शेखरो
देवशेखरः॥ विज्ञानज्ञानसंधान॥ स्तेजोराशीर्जगत्पतिः॥६२॥ भक्तलोकप्रसन्न॥ श्रीहंसः

त्मा॥ भक्तमंदारविग्रहः॥ भक्तदारिद्रदमनो॥ भक्तानांप्रीतिदायकः॥ ६३॥ भक्ता-
धीनमनाः पूज्यो॥ भक्तलोकशिवंकरः॥ भक्ताभिष्टप्रदः सर्व्व॥ भक्ताघौघनिकृंत
नः॥ ६४॥ अपारकरुणासिंधु॥ र्भगवान्‌भक्ततत्परः॥ इतिश्रीराधिकानाथ॥ सहस्र
नामकीर्त्तितं॥ स्मरणात्पापराशीनां॥ खंडनंमृत्युनाशनं॥ ६५॥ वैस्नवानांप्रिय
करं॥ महारोगनिवारणं॥ ब्रह्महत्यासुरापानं॥ परस्त्रीगमनंतथा॥ ६६॥ परद्रव्या
पहरणं॥ परद्वेषसमन्वितं॥ मानसंवाचिकंकायं॥ यत्पापंपापसंभवं॥ ६७॥ सह
स्रनामपठनात्सर्व्वंनश्यतितत्क्षणात्॥ महादारिद्रयुक्तोयो॥ वैस्नवोविस्नुभ-
क्तिमान्॥ ६८॥ कार्त्तिक्यांयःपठेद्रात्रौ॥ शतमष्टोत्तरंक्रमात्॥ पीतांबरधरोधीमा
न्॥ सुगंधैःपुष्पचंदनैः॥ ६९॥ पुस्तकंपूजयित्वाच॥ नैवेद्यादिभिरेवच॥ राधाध्या
नांकितोधीरो॥ वनमालाविभूषितः॥ ७०॥ शतमष्टोत्तरंदेवि॥ पठेन्नामसहस्र-
कं॥ चैत्रेशुक्लेचकृष्णेच॥ कुहूसंक्रांतिवासरे॥ ७२॥ पठितव्यंप्रयत्नेन॥ त्रैलोक्यं
मोहयेत्क्षणात्॥ तुलसीमालयायुक्तो॥ वैस्नवोभक्तितत्परः॥ ७३॥ रविवारेचशु

गोपा० ॥ लेच ॥ द्वादश्यां श्रद्धवासरे ॥ ब्राह्मणं पूजयित्वाच ॥ भोजयित्वा विधानतः ॥ ७४
॥ १० ॥ पठेन्नामसहस्रंच ॥ ततः सिद्धिमवाप्नुयात् ॥ महानिशायां सततं ॥ वैष्णवो यः
पठेत्सदा ॥ ७५ ॥ देशांतरगता लक्ष्मी ॥ स्तमायाति न संशयः ॥ त्रैलोक्ये च महादे
व्यः ॥ सौंदर्यः काममोहिताः ॥ ७६ ॥ मुग्धाः स्वयं समायांति ॥ वैष्णवं ते भजंति
ताः ॥ रोगी रोगात्प्रमुच्येत ॥ बद्धो मुच्येत बंधनात् ॥ ७७ ॥ गुर्विणी जनयेत्पुत्रं ॥ क
न्या विंदति सत्पतिं ॥ राजा च वश्यतां याति ॥ किं पुनः क्षुद्रमानवः ॥ ७८ ॥ सह
स्रनामश्रवणात्पठनात्पूजनात्प्रिये धारणात्सर्वमाप्नोति ॥ वैष्णवो नात्र सं
त्र संशयः ॥ ७९ ॥ वंशीवटे चान्यवटे ॥ तथा पिप्पलकेथवा ॥ कदंबपादपतले ॥
गोपालमूर्त्तिसन्निधौ ॥ ८० ॥ यः पठेद्वैष्णवो नित्यं ॥ स याति हरिमंदिरं ॥ कृष्णे
नोक्तं राधिकायै ॥ मयि प्रोक्तं तया प्रिये ॥ ८१ ॥ नारदाय मया प्रोक्तं ॥ नारदेन प्रका
शितं ॥ मया त्वयि वरारोहे ॥ प्रोक्तमेतत्सुदुर्लभं ॥ ८२ ॥ गोपनीयं प्रयत्नेन ॥ न प्रका
न ॥ न प्रकाश्यं कथंचन ॥ शठाय पापिने चैव ॥ लंपटाय विशेषतः ॥ ८३ ॥ ❀ ॥
श्रीकृष्णः
॥ १० ॥

नदातव्यंनदातव्यंनदातव्यंकथंचनः॥ देयंशांताय शिष्याय॥ विष्णुभक्ति
रताय च॥ ७४॥ गोदानब्रह्मयज्ञस्य॥ वाजपेयशतस्य च॥ अश्वमेधसहस्रस्य
फलं पाठे भवेत् ध्रुवं॥ ७५॥ मोहनंस्तंभनंचैव॥ मारणोच्चाटनादिकं॥ यद्यद्वां
छति चित्तेन॥ तत्तत्प्राप्नोति वैष्णवः॥ ७६॥ एकादश्यां नरः स्नात्वा॥ स्रुगंधिद्रव्य
तैलकैः॥ आहारं ब्राह्मणे दत्वा॥ दक्षिणां स्वर्णभूषणं॥ ७७॥ ततः आरंभकर्त्ता
स्य॥ सर्वप्राप्नोति मानवः॥ शतावर्त्तंसहस्रंच॥ यः पठेद्वैष्णवो जनः॥ ७८॥ श्रीवृं
दावनचंद्रस्य॥ प्रसादात्सर्वमाप्नुयात्॥ ८॥ यद्गृहे पुस्तकं देवि॥ पूजितंचैव
तिष्ठति॥ ७९॥ नमारीनचदुर्भिक्षं॥ नोपसर्गभयंक्वचित्॥ सर्पादिभूतयक्षाद्या
नश्यंते नात्र संशयः॥ ८०॥ श्रीगोपालो महादेवि॥ वसेत्तस्यगृहे सदा॥ यस्य गे
हे सहस्रंच॥ नाम्नां तिष्ठति पूजितं॥ २००॥ ॥ इति श्रीसंमोहतंत्रे पार्वती ईश्व
रसंवादे श्रीगोपालसहस्रनाम संपूर्णम्॥ १॥ श्रीकृष्णार्पणमस्तु:॥ ॥ श्रीमस्तु:॥
लिखतंचतुर्भुजरामानुजदासः॥ पठनार्थे श्रीनीवासाचार्य्यरामानुजदासः श्रीमस्तु॥

॥ गोपा० ॥ ११ ॥ ११

संवत् १९१७ का ॥ मीति भाद्रपद शुक्ला १५ भृगुवारान्वितं ॥ श्रीरामलक्ष्मणभरथशत्रु ॥ घ्न ॥ ११ ॥

पुस्तक बाचपढ श्रवणकश्रवणकरावजैनजै श्रीलक्ष्मीनारायणकी बंचीजयो ॥

(1062) गोपालसहस्रनाम. पत्र-11

सम्पूर्ण. संवत 1917.

12" X 6"